

# वैद्यनाथाष्टकम्-श्रीरामसौमित्रिजटायुवेद

https://www.chalisa.online

|| वैद्यनाथाष्टकम् ||

श्रीरामसौमित्रिजटायुवेद षडाननादित्य कुजार्चिताय ।
श्रीनीलकंठाय दयामयाय श्रीवैद्यनाथाय नमःशिवाय ॥ 1॥
शंभो महादेव शंभो महादेव शंभो महादेव शंभो महादेव ।
शंभो महादेव शंभो महादेव शंभो महादेव शंभो महादेव ॥
गंगाप्रवाहेंदु जटाधराय त्रिलोचनाय स्मर कालहंत्रे ।
समस्त देवैरभिपूजिताय श्रीवैद्यनाथाय नमः शिवाय ॥ 2॥
(शंभो महादेव)
भक्तःप्रियाय त्रिपुरांतकाय पिनाकिने दुष्टहराय नित्यम् ।
प्रत्यक्षलीलाय मनुष्यलोके श्रीवैद्यनाथाय नमः शिवाय ॥ 3॥
(शंभो महादेव)
प्रभूतवातादि समस्तरोग प्रनाशकर्त्रे मुनिवंदिताय ।
प्रभाकरेंद्वग्नि विलोचनाय श्रीवैद्यनाथाय नमः शिवाय ॥ 4॥
(शंभो महादेव)
वाक् श्रोत्र नेत्रांघ्रि विहीनजंतोः वाक्श्रोत्रनेत्रांघ्रिसुखप्रदाय ।
कुष्ठादिसर्वोन्नतरोगहंत्रे श्रीवैद्यनाथाय नमः शिवाय ॥ 5॥
(शंभो महादेव)
वेदांतवेद्याय जगन्मयाय योगीश्वरद्येय पदांबुजाय ।
त्रिमूर्तिरूपाय सहस्रनाम्ने श्रीवैद्यनाथाय नमः शिवाय ॥ 6॥
(शंभो महादेव)
स्वतीर्थमृद्भस्मभृतांगभाजां पिशाचदुःखार्तिभयापहाय ।
आत्मस्वरूपाय शरीरभाजां श्रीवैद्यनाथाय नमः शिवाय ॥ 7॥
(शंभो महादेव)
श्रीनीलकंठाय वृषध्वजाय स्रक्गंध भस्माद्यभिशोभिताय ।
सुपुत्रदारादि सुभाग्यदाय श्रीवैद्यनाथाय नमः शिवाय ॥ 8॥
(शंभो महादेव)
वालांबिकेश वैद्येश भवरोगहरेति च ।
जपेन्नामत्रयं नित्यं महारोगनिवारणम् ॥ 9॥
(शंभो महादेव)
॥ इति श्री वैद्यनाथाष्टकम् ॥

|| https://www.chalisa.online ||